दिनाङ्क: - 12.11.2024

सायम् - 06:20

## मुख्यवार्ताः

- झारखण्डीय-विधानसभा-निर्वाचनाय प्रथमचरणात्मिका सन्नद्धता सञ्जाताऽस्ति। श्वः चरणेऽस्मिन् त्रिचत्वारिंशत् आसनेभ्यः मतदानं भविता।
- महाराष्ट्रविधानसभायाः नैर्वाचनिक प्रचारोपक्रमः उत्तुंगतां भजते। विभिन्नानां राजनीतिकदलानां वरिष्ठाः नेतारः मतदातृन् समाक्रष्टुं सर्वविधयत्ने रताः सन्ति।
- भारतेन विश्वबौद्धिक-सम्पत्संकेतकस्य चतुर्विंशत्यधिक द्विसहस्रतमवर्षस्य प्रख्यापित-प्रतिवेदने पेटेन्ट-ट्रेडमार्क-इत्यादि त्रिषु क्षेत्रेषु वैश्विक शीर्षेषु दशसु देशेषु स्थानम् अधिगतम्।
- अद्य आराष्ट्रं लोकसेवा-प्रसारण-दिवसः समाचर्यते। दिवसोऽयं स्वातन्त्र्यवर्षे दिल्लीस्थम् आकाशवाणी-भवनं प्रति महात्मागान्धिनः एकवारमेव समागमनस्य स्मृतौ प्रतिवर्षं परिपाल्यते।
- राष्ट्रमण्डल क्रीडायाः कांस्यपदक विजेत्री ट्रीसाजॉली गायत्री गोपीचन्दः च अद्य महिला-युगल-स्पर्धायां पराजयानन्तरं कुमामोटो-मास्टर्स जापान-बैडमिण्टन-प्रतिस्पर्धायाः बहिः गतवत्यौ।

## झारखण्ड-निर्वाचनम्

झारखण्डीय-विधानसभा-निर्वाचनाय प्रथमचरणात्मिका सन्नद्धता सञ्जाताऽस्ति। श्वः चरणेऽस्मिन् त्रिचत्वारिंशत् आसनेभ्यः मतदानं भविता। द्वितीयचरणस्य मतदानं अस्यैव मासस्य विंशति-तालिकायां अष्टत्रिंशत् आसनेभ्यः भविष्यति। मतगणना च नवम्बर-मासस्य त्रयोविंशे दिनाङ्के भविष्यति। झारखण्डप्रदेशस्य मुख्यनिर्वाचनाधिकारिणा श्री के.-रविकुमारेण प्रोक्तं यत् विधानसभा-निर्वाचनस्य घोषणानन्तरं राज्यस्य विभिन्नेभ्यः भागेभ्यः नवसप्तत्युत्तरैक-शतकोटितोऽधिक-रुप्यकमूल्यानाम् अवैधानिक-सामग्र्यः धनानि च निग्रहितानि सन्ति। तावन् एन.डी.ए. इत्याख्यः राष्ट्रिय-लोकतान्त्रिक-संघः आई.एन.डी. आई.ए. इति च दलसमूहः सम्प्रति तत्र स्वकीयं ध्यानं केन्द्रीकुरुतः स्तः यत्र द्वितीयचरणीय मतदानं सम्भावितमस्ति। धनबादस्य झारिया इत्याख्ये क्षेत्रे भाषमाणेन भाजपेति दलस्य वरिष्ठनेत्रा गृहमन्त्रिणा अमितशाहेन उक्तं यत् जनाः, भ्रष्टं हेमन्तसोरेन-प्रशासनम् उत्पाट्य क्षिपन्त्विति।

## प्रधानमन्त्री-चन्द्रपुर रैली

महाराष्ट्रविधानसभाया: नैर्वाचनिक प्रचारोपक्रम: उत्तुंगतां भजते। विभिन्नानां राजनीतिकदलानां वरिष्ठा: नेतार: मतदातृन् समाक्रष्टुं सर्वविधयत्ने रता: सन्ति। भाजपेतिदलस्य वरिष्ठ नेता प्रधानमन्त्री च नरेन्द्रमोदी अद्य महाराष्ट्रस्य तीव्रविकासाय महायुति-प्रशासनस्य प्रशंसां कृतवान्। चन्द्रपुर जनपदस्य चिमूर इति क्षेत्रे एकां नैर्वाचनिकजनसभां सम्बोधयता श्रीमोदिना भणितं यत् अयं महायुतिप्रशासनस्य सत्प्रयासानां परिणाम: अस्ति यत् गतद्वाभ्यां वर्षाभ्यां महाराष्ट्रप्रदेश: सर्वाधिकतया प्रत्यक्ष-विदेश-धन-निवेशे सक्षमतम: अभवत्। श्रीमोदिना भाजपेति दलस्य घोषणापत्रस्य प्रशंसाकुर्वता उक्तं यत् ए.आई. विश्व-विद्यालय:, जलग्रिड इति परियोजना:, आवासयोजना:, नलिका-जल-सम्पर्कजाल:, आद्य: महत्वाधायिन्य: घोषणा: महाराष्ट्रस्य उज्ज्वलभविष्याय लाभकारिण्य: सन्तीति।

## भारतं-पेटेण्टइति

भारतेन विश्वबौद्धिक-सम्पत्संकेतकस्य चतुर्विंशत्यधिक द्विसहस्रतमवर्षस्य प्रख्यापित-प्रतिवेदने पेटेन्ट-ट्रेडमार्क-इत्यादि त्रिषु क्षेत्रेषु वैश्विक शीर्षेषु दशसु देशेषु स्थानम् अधिगतम् एतस्मिन् प्रतिवेदनेन ज्ञायते यत् शीर्ष-अर्थव्यवस्थासु पेटेन्ट ट्रेडमार्क इत्येतौ समेत्य औद्योगिक-प्रारूप-अनुप्रयोगेषु उल्लेखनीया वृद्धि: जाता। भारतस्य बौद्धिक-सम्पदा इति आईपी इत्यस्मिन् परिदृश्ये वैश्विक नेतृत्वरूपेण स्वकीयं स्थानं प्रबलतया स्थापयतीति।

## राजनाथ सिंह:-दिल्ली संवाद

रक्षान्त्रिणा राजनाथसिंहेन अद्य युद्ध-सुरक्षयो: सम्भावितसंकटेभ्य: प्रभावपूर्णरीत्या मुक्तये सानकूला: रक्षारणनीतय: महत्वाधायिन्य: भविष्यन्तीति रेखांकितम् । नवदिल्ल्यां दिल्ली-रक्षा-संवाद: इत्याख्यस्य कार्यक्रमस्य उद्घाटनोद्बोधने श्रीसिंहेन सबलं निगदितं यत् सानुकूली रक्षेति एकं रणनीतिजन्यं विकल्पं नास्ति परन्तु एका आवश्यकता वर्तते। तेन सबलं प्रतिपादितं यत् रक्षाव्यवस्था तादृशी भवेत्, यया राष्ट्रं भविष्यत्कालिकानाम् आकस्मिकतया आगतानां संकटानां साम्मुख्यं सरलतया करणे सक्षमं स्यात्।

## लोकसेवा-प्रसारदिवस:

अद्य आराष्ट्रं लोकसेवा-प्रसारण-दिवस: समाचर्यते। दिवसोऽयं स्वातन्त्र्यवर्षे दिल्लीस्थम् आकाशवाणी-भवनं प्रति महात्मागान्धिन: एकवारमेव समागमनस्य स्मृतौ प्रतिवर्षं परिपाल्यते। महात्मागान्धिना विस्थापितजना: संबोधिता: आसन्, ये हि हरियाणाया: 'कुरुक्षेत्र' इति स्थले अस्थायिरूपेण निवासिता: आसन्। सप्तसप्ततिवर्षपूर्वं दिवसोऽयं दिपावल्या: पवित्रावसरे आसीत्। तस्मिन् समये श्रीगांधीवर्य: तै: विस्थापितै: सह साक्षात्मेलने समर्थ: नाभवत्, अत: तेन आकाशवाण्या: माध्यमेन जना: सम्बोधिता: आसन्। गान्धिन: सम्बोधनमिदं प्रथमम् अन्तिमञ्च आसीत्। गान्धिना स्वकीयोद्बोधनस्य शुभरम्भ: मम भ्रातरो भगिन्यश्चेति उक्ता कृत: आसीत्। श्रीगान्धीवर्येण आकाशवाणीति माध्यमं ईश्वरस्य चामत्कारिकी शक्ति: अस्तीति अपि उक्तमासीत्।

## प्रधानमन्त्री बिलियडर्स

प्रधानमन्त्री नरेन्द्रमोदी पंकज-आडवाणी-इत्यस्मै चतुर्विंशत्यधिक द्विसहस्रतमवर्षस्य विश्वविजेतास्थानस्य प्राप्तेरनन्तरं शुभकामना: प्रदत्तवान्। स्वकीये सन्देशे प्रधानमन्त्री पङ्कजस्य समर्पणस्य उत्साहस्य प्रतिबद्धतायाश्च प्रशंसां कृतवान्।

## प्रत्यक्षकरसंग्रह:

राष्ट्रस्य शुद्ध-प्रत्यक्ष-करसंग्रह: दशमलव-एक-चतुरधिक-पञ्दश-प्रतिशतम् वर्धितमस्ति। वित्तवर्षेऽस्मिन् साम्प्रतं यावत् दशसहस्राधिक-द्वादशलक्षकोटितोऽधिक: करसंग्रह: सञ्जातोऽस्ति। सीबीडीटी इत्याख्येन केन्द्रीयकरसंग्रहसंघेन एतत्प्रतिपादितं यत् अस्यवर्षस्य एक-अप्रैलत: दश-नवम्बरान्तं यावत् प्रत्यावर्तिन: धनस्य समायोजनं प्राक् सकल-प्रत्यक्षकर-संग्रह: दशमलव-द्वि-अधिक-एकविंशति: प्रतिशतं वरीवर्ध्य पञ्चदश लक्षकोटितोऽपि अधिक: सञ्जात: आसीत्। अस्मिन् कालावधौ एकनवति-सहस्राधिक-द्विलक्षकोटि-रूप्यकाणां कर-प्रत्यावर्तनं कृतमस्ति। यद्धि गतवर्षस्य अस्यैव कालस्य करग्रहणस्य तुलनायां त्रिपञ्चाशत् प्रतिशतम् अधिकमस्ति।

## दौरभाषिक- संवादभङ्गः

संरचारमन्त्रालयः दौरभाषिक-सम्वाद-मध्ये विच्छिन्न-सम्पर्कात्मकानि प्रकरणानि निरीक्षन् अस्ति। उपभोक्तृणां समस्यानां न्यूनीकरणाय मन्त्रालयः प्रतिमासं सेवायाः गुणवत्ता इत्यस्योपरि निरीक्षणात्मकः दृष्टिपातः विदधाति। सूत्रानुसारि मन्त्रालयः वर्षे वारचतुष्टयं परित्यज्य प्रतिमासं गुणवत्तायाः निरीक्षणं करष्यिति। सूत्रैः एतदपि उक्तं यत् सर्वकारः विलंबता-सम्बन्धितानि मानदण्डानि अन्ताराष्ट्रियस्तरीय कर्तुमपि प्रभवते इति। मानदण्डानाम् अनुपालनं न करणे सति सञ्चार-उद्योगाः धनात्मकदण्डैरपि दण्डिताः भवितुं शक्नुवन्तीति।

## जापान-मास्टर-क्रीडा

राष्ट्रमण्डल क्रीडायाः कांस्यपदक विजेता ट्रीसाजॉली गायत्री गोपीचन्दः च अद्य महिला-युगल-स्पर्धायां पराजयानन्तरं कुमामोटो-मास्टर्स जापान-बैडमिण्टन-प्रतिस्पर्धायाः बहिः गतवत्यौ।

।।इति वार्ताः।।